# वाक्यार्थज्योतिः
# Vākyārthajyotiḥ

अङ्कः - 1 वर्षः - 2014-15

प्रधानसम्पादकः

प्रो. अर्कनाथः चौधरी

सम्पादकौ

डॉ. ललितकुमारः पटेलः

डॉ. जानकीशरणः आचार्यः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम्

B.A.P.S.

Scanned with CamScanner

# वार्षिकप्रतिवेदनम्

२०१४-१५ तमे शैक्षणिकवर्षे वाक्यार्थपरिषदि विद्वद्भिः विश्वविद्यालयाध्यापकैः प्रस्तुतानां वाक्यार्थानां विवरणमत्र प्रस्तूयते ।

**१. उद्घाटनसमारोहः प्रथमाधिवेशनञ्च -**

दिनाङ्कः - २९-०९-२०१४

उद्घाटकाः अध्यक्षाश्च - प्रो. वेम्पटि कुटुम्बशास्त्रिवर्याः

**वाक्यार्थप्रस्तोतारौ विषयौ च -**

१. प्रो. विनोदकुमारझा - रँप्रत्याहारविमर्शः

२. डॉ. ललितपटेलः - भारतीयप्रतिभातत्त्वचिन्तनपरिप्रेक्षे राजशेखरदिशा प्रतिभा

**२. द्वितीयाधिवेशनम् -**

दिनाङ्कः - १६-१०-२०१४

अध्यक्षः - डॉ. नरेन्द्रकुमारः एल्. पण्ड्या

**वाक्यार्थप्रस्तोतारो विषयाश्च -**

१. प्रो. देवेन्द्रनाथपाण्डेयः - वैदिकव्याख्यायाः घटकतत्त्वपरिशीलनम्

२. डॉ. अमृतलालभोगायता - दीक्षाविचारः

३. डॉ. शत्रुघ्नपाणिग्राही - वर्तमानसमये पर्यावरणसमस्या तदर्थं वैदिकोपायाः

**३. तृतीयाधिवेशनम् -**

दिनाङ्कः - २८-११-२०१४ अध्यक्षः - प्रो. देवेन्द्रनाथपाण्डेयः

**वाक्यार्थप्रस्तोतारो विषयाश्च -**

१. डॉ. नरेन्द्रकुमारः एल्. पण्ड्या - काव्यशास्त्रीयः गुणविमर्शः

२. डॉ. महेन्द्रः अं. दवे - मृच्छकटिके वर्णितः राजधर्मः

३. डॉ. पङ्कजकुमारः एस्. रावलः - आरोग्यप्राप्तौ आहारविहारस्य योगदानम्

**४. चतुर्थाधिवेशनम् -**

दिनाङ्कः - १०-०३-२०१५

अध्यक्षः - प्रो. विनोदकुमारः झा

**वाक्यार्थप्रस्तोतारौ विषयौ च -**

१. डॉ. दीपेशः कतिरा - संस्कृतभाषायां सङ्ख्याप्रयोगविमर्शः

२. डॉ. [illegible] आचार्यः - साधनचतुष्टयविमर्शः

Scanned with CamScanner

# विषयानुक्रमणिका


१. वैदिकव्याख्यायाः घटकतत्त्वपरिशीलनम् ०१-१०

प्रो. देवेन्द्रनाथः पाण्डेयः

२. काव्यशास्त्रीयः गुणविमर्शः ११-२०

डो. नरेन्द्रकुमार एल. पण्ड्या

३. 'रँ' प्रत्याहार-विमर्शः २१-३०

प्रो. विनोद कुमार झा

४. अमोघत्वं भवभूतेः ३१-३९

प्रो. अर्चना दुबे

५. मृच्छकटिके वर्णिता राज्ञः राज्यस्य च विभावना ४०-४५

डॉ. महेन्द्रकुमार अं. दवे

६. वैदिकवाङ्मये दीक्षाविचारः ४६-५०

डॉ. अमृतलालः भोगायता

७. भारतीयप्रतिभातत्त्वचिन्तपरिप्रेक्ष्ये राजशेखरदिशा प्रतिभा ५१-५९

डॉ. ललित पटेलः

८. वर्तमानसमये पर्यावरणसंरक्षणस्यावश्यकता तदर्थं वैदिकोपायाः ६०-६७

डॉ. शत्रुघ्नपाणिग्राही

९. वसंस्कृतसाहित्यदृष्ट्या धर्मः ६८-७२

डॉ. डायालाल एम. मोकरिया

१०. आयुर्वेददृष्ट्या आरोग्यप्राप्तौ आहार-विहारयोः योगदानम् ७३-८१

डॉ. पङ्कजकुमार एस्. रावलः


Scanned with CamScanner

११. ज्यौतिषशास्त्रे पर्यावरणविज्ञानम् ८२-८८

डॉ. रमेशचन्द्रबाबूलालशुक्लः

१२. आधुनिकसंस्कृते सङ्ख्याप्रयोगविमर्शः ८९-९६

डॉ. दीपेश विनोद कतिरा

१३. साधनचतुष्टयविमर्शः ९७-१११

डॉ. जानकीशरणः आचार्यः

१४. न्यायशास्त्रीयप्रकरणग्रन्थानां परिचयः ११२-१२१

बी. उमा महेश्वरी

१५. ज्यौतिषे कालस्वरूपम् १२२-१२८

उमाशंकर झा

१६. Deviations and Innovations Introduced in the भीष्मचरितम् By Dr. Hari Narayan Dikshit in Comparison to the महाभारत १२९-१३६

**Dr. Kartik Pandya**

१७. Open Access and Institutional Repository (IR) or Digital Library (DL) १३७-१४९

**Ravindra Suryakant Kale**

१८. મેદસ્વી બાળક : સમૃદ્ધિ કે સમસ્યા ? १५०-१५५

ડૉ. જયેશકુમાર ડી. મુંગરા

Scanned with CamScanner

# आयुर्वेददृष्ट्या आरोग्यप्राप्तौ आहार-विहारयोः योगदानम्

✍ डॉ. पङ्कजकुमार एस्. रावलः

'शरीरं व्याधिमन्दिरं' शीर्यते इति शरीरं मानवशरीरम् आदि-व्याधिउपाधीनां गृहं विद्यते। अत्रैव चतुर्षु वेदेषु ऋग्वेदस्योपवेद आयुर्वेदः प्रस्थापितः येन ऋग्वेददृष्ट्या मानवः जीवनं यापयति चेदायुर्वेदस्यावश्यकता न भविष्यति यदि तदनुगुणं न जीवति चेदायुर्वेदः साक्षात्पुरः स्थितः।

अस्माकं शास्त्राणि अत्रैव पूज्यानि मान्यानि आदरपूर्णानि वन्दनीयानि च सन्ति यद्मानवस्य प्रत्येकऽस्मिन् समये चिन्तां कुर्वन्ति सर्वास्ववस्थासु स्थितानि भवन्ति। न स्थितानि अपि तु तादृशास्ववस्थासु मार्गदर्शनमपि कुर्वन्ति संशयानां संहारमपि कुर्वन्ति।

शरीरे रोगः तदैव प्रविशति यदा मनोबलं मानवस्य क्षीणं स्यात् भवेद्वा। मनोबले शिथिले जाते सति रोगः प्रवेशं प्राप्नोति। मानसिकरीत्या मानवः रुग्णः प्रप्रथमः भवति पश्चात् शारीरिकदृष्ट्या रुग्णः भवति। अतः यदि मानवः शारीरिकदृष्ट्या स्वस्थः स्थातुमिच्छति चेत् तस्य द्वौ उपायौ स्तः।

(१) प्रथमस्तु तेन मानसिकदृष्ट्या स्वस्थेन भाव्यम्।

(२) वेदपरम्परया ऋषिपरम्परया जीवनं यापनीयम्।

अर्थात् ऋषिभिः या दिनचर्या निर्दिष्टा वर्तते तस्याः परम्परायाः वाहकत्वेन स्थातव्यं जीवनं यापनीयम्। तर्हि प्रश्नः भवति तत्र वेदपरम्परायां के नियमाः सन्ति तदर्थं ऋषिभिरुक्तम् यत् -

**हिताशी स्यान्मिताशी स्यात् कालभोजी जितेन्द्रियः।**[१]

अद्य मानवः मौनं धारयितुं शक्नोति किन्तु कदा कुत्र केन सह कीदृशं कियद्वक्तव्यं तत्र जानाति। संयमपूर्वकस्य भाषणस्य ज्ञाता कश्चित् विरलः भवति। इयमेव वार्ता एतदेव कथनं अयमेव नियमः भोजनविषये प्रज्वलति। स्वास्थ्यं सुरक्षितं स्थापयितुं

Scanned with CamScanner

शास्त्रैः सर्वाधिकं महत्त्वं मनसि स्थापितं विद्यते। मनः संयमितं स्थिरं स्वस्थं च भवति तिष्ठति चेत् शरीरं संयमितं स्थिरं स्वस्थं वा स्वत एव भविष्यति।

अद्य कश्चिद् जनः कुत्रचित मिलति चेत् प्रथमं पृच्छति कीदृशोऽस्ति भवान्? प्रत्युत्तरमपि एकं निश्चितं विद्यते यत् कुशलोऽस्मि स्वस्थोऽस्मि सम्यगस्मीति। किन्तु वास्तविकतया अद्यतनीये समाजे मानवः स्वस्थः कुशलः सम्यग् वा अस्ति? इत्यस्ति एकः जटिलः प्रश्नः।

आदिनं कीदृशोऽस्ति इति तु बहवः पृच्छन्ति वास्तविकमुत्तरं कस्मै ददामि तदस्ति संशयस्य विषयः। किन्तु वास्तविकरूपेण मानवः कथयति यत् स्वस्थोऽस्मि कुशलोऽस्मि तर्हि तदर्थं समय अस्ति। यथा स्वस्थस्य व्याख्या परिभाषा वा कथयति -

**समदोषाः समाग्निश्च समधातुमलक्रियः।**
**प्रसन्नात्मेन्द्रियमनः स्वस्थ इत्यभिधीयते॥**[२]

कफ-पित्त-वातादित्रयो दोषाः मनुष्यशरीरे विराजमानाः भवन्ति ते समावस्थायां स्युः शरीरे स्थिताः अग्नयः समानावस्थायां स्युः धातवः समाः स्युः मलक्रियादि सर्वाः नित्यक्रियाः सहजतया भवन्ति आत्मेन्द्रियमनांसि प्रसन्नवस्थायां स्युः तदानीं जनः स्वस्थोऽस्मीति वक्तुं प्रभवति स स्वस्थोऽस्ति।

"**स्वस्मिन् तिष्ठति स स्वस्थः**" शास्त्रैः आयुर्वेदेन च कलियुगे मानवस्यायुष्यं १०० वर्षीयं कल्पितं विद्यते। शतं जीवेम शरद[३] किन्तु एतद् त्तदेव सार्थकं भवति यदा मानवः आयुर्वेदानुसारं जीवनं जीवति-

**वामशायी द्विभुञ्जानः षण्मुत्रीद्विपुरीषयोः।**
**स्वल्पमैथुनकारी च शतवर्षाणि जीवति॥**[४]

स्वास्थ्यं स्थिरं कर्तुं आयुर्वेदेन पञ्चसु प्राधान्यं प्रदत्तं विद्यते-

**स्वास्थ्यम्**

- आहारः
- श्रमः
- विश्रामः
- मानसिकसंतुलनम्
- पञ्चमहाभूतानां सेवनम्

**स्वास्थ्यमसमिचीने जाते सति प्रथमं तु मानवेन स्थानपरिवर्तनं वायुपरिवर्तनं च कर्तव्यं शास्त्रं तु स्वास्थ्यहानौ प्रदत्तकारणेषु कथयति यत्-**

Scanned with CamScanner

पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते।
तच्छान्तिरौषधैर्दानैः जपहोमसुरार्चनैः ।।[५]

स्वास्थ्यप्राप्तौ सर्वरोगनिवारणार्थं प्रथमोपायोऽस्ति सत्कर्मसमाराधनं प्रभुभक्तिः, दानं जपाः होमकर्माणि सुरार्चनश्च। अस्मिन्नेव विषये अग्निपुराणं समर्थयति यत् -

''सर्वरोगप्रशान्त्ये स्याद्विष्णोर्ध्यानं च पूजनम्।''[६] सर्वेषां रोगाणां निवारणाय विष्णोः ध्यानं पूजनं च कर्तव्यम्।

भूतानामुपकाराय तथा धर्मो महौषधम्।[७]

पुराणेष्वपि आयुर्वेदं विद्यते तद् तदानीं सिद्धं भवति यदा एकवारं ब्रह्मवैवर्तपुराणस्य वैदिकसंहितां पठेम। तत्पुराणं कथयति सा च संहिता वदति यत् केनोपायेन मानवः रोगाद्दूरं स्थातुं शक्नुयात् ? स्वास्थ्यं प्राप्तुं सङ्कल्पबलमनिवार्यमिति तस्याः संहितायाः एकं वचनं यदहं न कदापि रूग्णः स्यामित्यस्ति ममात्मबलं मनोबलं सङ्कल्पबलं वा तदैव स रुग्णः रोगान्वितश्च न भवति।

आयुर्वेदस्य हेतुषु तादृशं नास्ति यत् मानवः न कदापि रुग्णः स्यात् किन्तु आयुर्वेदस्य मुख्यहेतुः अन्तःकरणशुद्ध्यै अस्ति। आयुर्वेदस्य मुख्यं लक्ष्यम् अन्तः करणशुद्धिः वर्तते।

अस्माकं दिव्यां परम्परामभिनन्द्याभिवाद्य च एकवारं पश्यन्तु यत् कुरुक्षेत्रे समराङ्गणे भगवान् श्रीकृष्णोऽपि अर्जुनस्य स्वास्थ्यचिन्तां कुर्वन् मनोबलं दातुं तेनैव शारीरिकस्वास्थ्यमपि प्राप्तुं युद्धावसरे कथयति यत् -

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।[८]

हे पार्थ ! आहार-विहार-निद्रा-जागरणं सर्वं समप्रमाणे योग्यप्रमाणे भविष्यति करिष्यति चेन्न किमपि कष्टं भविष्यति नान्यथा युद्धभूमौ तु विरलाः पराक्रमशालिनः, शूरा अपि रूग्णाः भवन्ति तवापीत्थं न भवेत् तदर्थं स्वास्थ्यप्राप्त्यै कथयामि। अत्याहारः एकान्ते अतिभोजनम्, नाधिकं जागरणं नातिनिद्रा एतानि रूग्णतायाः कारणानि सन्ति अस्वस्थतायाः कारणानि च सन्ति।[९]

भूमिः किं पापभारेण जनसंख्याभारेण भीता विद्यते ? एताभ्यां भाराभ्यां सा कम्पति ? न, अपि तु सा पापभारेण अवनता भवति पापमपि एकः रोगः तस्य रोगस्यौषधं

Scanned with CamScanner

धर्मकर्माणि पुण्यकर्माणि च सन्ति।

स्वास्थ्यविषयचर्चायां छान्दोग्योपनिषद् उपनिषत्सु प्रप्रथममागच्छति कथयति च-

**आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवास्मृतिः ।**
**स्मृतिलाभे सर्वग्रन्थीनां विप्रमोक्षः ॥[१०]**

अत्रापि आहारशुद्धिः प्रथमावश्यकी यद्यारोग्यं प्राप्तव्यं चेत्।

आहारप्राप्त्यावसरे पञ्चनियमाः पालनीयाः भवन्ति ततश्च भोजनारम्भः भवति। तद्यथा-

**पञ्चार्द्रो भोजनं कुर्यात् प्राङ्मुखो मौनमास्थितः ।**
**हस्तौ पादौ तथैवास्यमेषा पञ्चार्द्रता मता ॥[११]**

मनुस्मृतिरपि मानवस्य दीर्घायुर्विषये स्वमतं स्वाभिष्टप्रायं च प्रददाति यत् भोजनकाले पादौ आर्द्रौ करणीयौ तथैव ''नार्द्रपादस्तु शयीत'' ''आर्द्रपादाभ्यां न शयनं करणीयम्'' इति।

भोजनावसरे पादौ आर्द्रौ स्तः चेत् स नरः दीर्घजीवि भवति। तथा च ''एकवस्त्रे न भुञ्जीत''[१२] भोजने जाते सति तस्य भोजनस्योदरे त्रयो भागाः भवन्ति।

भोजनस्य त्रयो भागाः त्रीणि कार्याणि च-

| स्थूलभागः | मध्यभागः | सूक्ष्मभागः |
|---|---|---|
| मलकार्यम् | मांसनिर्माणकार्यम् | मनसः पुष्टिकार्यम् |

अस्माकम् आर्यशास्त्रं भोजने कस्य दृष्टिः शुभाशुभा वा तद्विषयेऽपि कथयति।[१३]

अस्माकं आर्यपरम्परायां भोजनात्प्राग् **'अन्नपूर्णा मातुः जय'** इति जयघोषः भवति। यथा उपरि भोजनस्य त्रयो भागाः दर्शिताः तथैव भोजनस्य अन्नस्य त्रयो देवाश्च सन्ति।

**अन्नं ब्रह्मा रसो विष्णुः भोक्ता देवो महेश्वरः ।**
**एवं ज्ञात्वा नरो भुङ्क्ते सोऽन्नदोषैर्न लिप्यते ॥[१४]**

आपस्तम्बधर्मसूत्रं तु तावद् कथयति -

**दिवा पुनर्न भुञ्जीत नान्यत्र फलमूलयोः ।[१५]**

दिवसे एकवारमेव भोक्तव्यं यदि द्वितीयवारस्य भोजनस्यावश्यकता भवति चेत्

फलानि मूलानि च स्वीकर्तव्यानि न तु पूर्णं भोजनं स्वीकर्तव्यम्।

भोजनकाले यदि कस्यापि अशुभा दृष्टिः पतति चेत् तस्यापि निवारणं शास्त्रे दत्तं विद्यते।[१६]

भोजनान्ते जलपानस्यापि केचन नियमास्सन्ति तत्रायुर्वेदः कथयति यत्-

**अत्यम्बु पानाच्चविपच्यतेऽन्नमनम्बु पानाच्च स एव दोषः।**
**तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि।।[१७]**
**अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्।**
**भोजने चामृतं वारि भोजनान्ते विषप्रदम्।।[१८]**

मनुष्यस्य स्वास्थ्यलाभाय प्रकृत्या अष्टचिकित्साः प्रदत्तास्सन्ति।

**अष्टचिकित्साः**

वायुः | आहारः | जलम् | उपवासः | निद्रा | सूर्यः | व्यायामः | विचारः

एतेषां विस्तारे लेखविस्तारः भविष्यति अतः सामासिकभाषया अग्रे सरामि।

सुभाषितश्लोकसारल्येन कतिपय श्लोकास्तु बाल्यवस्थायामेव स्वास्थ्यलाभाय पाठ्यन्ते तद्यथा-

**दिनान्ते च पिबेत् दुग्धं निशान्ते च पिबेत् पयः।**
**भोजनान्ते पिबेत् तक्रं किं वैद्यस्य प्रयोजनम्।।[१९]**

अहं रूग्णः नैव स्यामिति विश्वासः मानवं स्वस्थं स्थापयति कारणं **"विश्वासः फलदायकः"** अत एव सप्तस्थानेषु यादृशी तस्य जनस्य श्रद्धा भावना वा तथैव सा फलीभूता भवति।[२०]

कुमारसम्भवमहाकाव्येन मानवाय एकं प्रसिद्धं पद्यं वाक्यं वा प्रदत्तं स्वास्थ्यविषये यद् शरीरमिदं तु धर्मसाधनं विद्यते। शरीरं स्वस्थं स्थापनीयं तदस्ति मानवस्य प्रथमं कर्तव्यम्। कुमारस्मभवमहाकाव्ये अत एव ब्रह्मचारीवेशेण समागतः शिवः उमायै कथयति वाक्यमिदं पद्यमिदं वा।[२१]

भोजनान्ते चलनीयं तदपि प्रसिद्धं विद्यते तदपि आयुर्वेदस्थनियमेष्वेकः नियमः यत्-

**"भुक्त्वा शतपदं गच्छेत् छायायां तु शनैः शनैः।"[२२]**

Scanned with CamScanner

गुर्जरभाषायामपि उक्तं विद्यते यत्-

"બપોરે જમીને આડા પડવું, રાત્રે જમીને ફરવા ઉપડવું"

आयुर्वेदस्याधिकी औषधचर्चा अथर्ववेदे जाते सति ऋग्वेदस्योपवेद आयुर्वेदः न तु अथर्वणः तत्र कारणमिदमस्ति यत् ऋग्वेदे ऋषिभिः अस्माकं दिनचर्या निर्दिष्टा तदनुगुणं जीवनं चलति चेत् किम् औषधस्य प्रयोजनं किन्तु यदि तेन प्रमाणेन मानवः जीवनं न जीवति चेदुपवेदभूतः आयुर्वेदः पुरः स्थित एवास्ति। नान्यथा -

**विनापि भेषजं व्याधिः पथ्यादेव निवर्तते।**
**न तु पथ्यविहीनोऽयं भेषजानां शतैरपि॥२३**

अस्य श्लोकस्य गुर्जरपद्यं समभावं विद्यते-

"પરેજી પાળતા રોગીને ઔષધથી શું કામ?"
"પરેજી જો પાળે નહીં, તો ઔષધ કરે શું કામ?"

अस्मिन् विषये विज्ञानशास्त्रयोरैक्यमतमुपरोक्तविषये तु अस्त्यैव किन्तु बहुषु स्थानेषु विद्यते यथा -

**न स्नानमाचरेद् भुक्त्वा।**[२४]

अतिभोजनम् अतिभाषणं च प्राणघातकं विद्यते।[२५]

भोजनकाले पञ्चाशत् प्रतिशतभागेन उदरपूर्तिः करणीया पञ्चविंशतिप्रतिशद्भागेन जलपूर्तिः करणीया। वायुः सञ्चरणार्थाय पञ्चविंशतिप्रतिशद्भागः रिक्तः स्थापनीयः।[२६] हितोपदेशस्तु हिताय उपदिशति यत् यत्र वैद्यः न वसति तत्र न स्थातव्यम्।[२७]

शास्त्रे आरोग्यस्य कामना भास्कराद् कृता विद्यते।[२८]

स्वास्थ्यलाभहानिः त्रिभिः कारणैः प्रकृतिभिश्च भवति तत्र कारणं शरीरान्तः-भागे विचारसृष्टिः कीदृशी तदाधारितं विद्यते।

**कफः सञ्जायते मोहात् तमसोऽपि जडः स्मृतः।**
**अतश्चित्तमशुद्धं हि तीव्रं चेत् दोषता भियात्॥**
**रागादिदूषितं चित्तं गदजालं तनोति हि।**
**कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयो मलाः॥२९**

आहारं विना कलौ न चलिष्यति अपितु **"स्वल्पाहारः सुखावहः।"** कारणं देहस्थापनायाहारस्तु अनिवार्यः कारणं देहो ह्याहारसम्भवः।

**"कलौ अन्नमयप्राणाः"**

श्रीमद्भगवद्गीता अपि आहारप्रकरणं त्रिधा विभजति। सात्विकाहारः राजसिकाहारः तामसिकाहारश्च।[३०] प्रभुः नैच्छति यत् ममांशः फास्टफुड् अश्नीयात्। आरोग्यवार्तायां गीता त्रीन् रोगान् तस्योपायान् च वर्णयति।

**त्रयो रोगाः तस्योपायाश्च**

- तनुरोगः — ग्रहणम् अतिवस्तुनः त्यागेन शरीरशान्तिः
- युक्तस्य
- मनोरोगः — आन्तरिकविकृतित्यागैः मनोरोगस्य शान्तिः
- भवरोगः — भगवच्छरणप्राप्त्या भवरोगशान्तिः

कफपित्तवातादिदोषाणां वैषम्येन रोगप्राप्तिर्हि जायते।

**"रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता।"[३१]**

यदि त्रिषु दोषेषु वैषम्यं भवति चेत् निवारणयायुर्वेदः कथयति-

शर[illegible] कफनाशाय वातनाशाय मर्दनम्।
वमनं पित्तनाशाय ज्वरनाशाय लङ्घनम्॥[३२]

चरकसंहिता शरीरम् अपि शरीरं व्याधेः आश्रयभूतं स्थानं परिगणयति।

**शरीरं सत्वसंज्ञं च व्याधीनामाश्रयो मतः॥[३३]**

परमपूज्याः वि.व.श्रीकृष्णशङ्करशास्त्रिणः कदाचित् शरीरधर्मानुसारं ज्वरग्रस्ताः भवन्ति स्म चेत् तदानीं ते श्रीमद्भागवतमहापुराणस्थां ज्वरस्तुतिं[३४] प्रकुर्वन्ति स्म। शास्त्रैः उपायाः दर्शिताश्चेत् न केवलं दर्शनाय अपि तु आचरणाय। तस्यासीत् परमोज्ज्वलं साक्षादुदाहरणम् पू. शास्त्रिणः दादाजीचरणाः अतः तान् प्रणम्य सर्वेषां स्वस्थताम् आरोग्यतां प्रकाम्य भारतीयसनातनसंस्कृतेः सर्वोन्नतं सर्वकल्याणकारकं मङ्गलकामनां यत् वितनोति तत् पद्यं स्मृत्वा समाप्तिं यामि।

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्॥[३५]**

***

Scanned with CamScanner

## पादटिप्पणयः

(१) चरकसंहिता
(२) शुश्रुतसंहिता, १५/४०
(३) यजुर्वेदः
(४) भावप्रकाशः
(५) धन्वन्तरी
(६) अग्निपुराणम्, २८०/४८
(७) तदेव, २८४/४
(८) श्रीमद्भागवद्गीता, ६/१७
(९) तदेव, ६/१६
(१०) छान्दोग्योपनिषत्, ७/२६/२
(११) मनुस्मृतिः
(१२) तदेव
(१३) पितृ-मातृ-सुहृद-वैद्य पुण्यकृद् हंस बर्हिणाम्।
सारसस्य चकोरस्य भोजने दृष्टिरुत्तमा ॥ आर्यशास्त्रम्
(१४) विष्णुपुराणम्
(१५) भावप्रकाशः
(१६) अञ्जनीगर्भसम्भूतं कुमारं ब्रह्मचारिणम्।
दृष्टिदोषविनाशाय हनुमन्तं स्मराम्यहम् ॥
(१७) भावप्रकाशः
(१८) तदेव
(१९) सुभाषितपद्यावली
(२०) मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥
(२१) अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते।
अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम् ॥
- कुमारसम्भवमहाकाव्यम्-५/३३
(२२) आयुर्वेदः
(२३) भावप्रकाशः
(२४) शुश्रुतसंहिता
(२५) जिह्वेप्रमाणं जानीहि भोजने भाषणेऽपि च।

Scanned with CamScanner

अतिभुक्तिः अतिवक्तिः सद्यःप्राणहराणि च ॥ - सुभाषितम्

(२६) कुक्षेर्भागद्वयं भोज्यैस्तृतीये वारिपूरयेत् ।
वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत् ॥ - भावप्रकाशः

(२७) हितोपदेशः - मित्रलाभः

(२८) मत्स्यपुराणम्

(२९) मानसायुर्वेदः

(३०) गीता, १७/८-९-१०

(३१) अष्टाङ्गहृदयम्, १/२०

(३२) चरकसंहिता

(३३) तदेव

(३४) श्रीमद्भागवतमहापुराणम् (उत्तरार्धः) १०-६४

(३५) गरूडपुराण उत्तरार्धः

***